# Shriramaproktah Bhagavatah Vasudevasya Dhyanaprakarah

# શ્રીરામપ્રોક્તઃ ભગવતઃ વાસુદેવસ્ય ધ્યાનપ્રકારઃ

## Document Information

Text title : Shriramaproktah Bhagavatah Vasudevasya Dhyanaprakarah

File name : vAsudevasyadhyAnaprakAraH.itx

Category : vishhnu, viShNu, dhyAnam, krishna

Location : doc_vishhnu

Transliterated by : Vinita Ram

Proofread by : Vinita Ram

Description/comments : Bhargavatantra Adhyaya 9, verses 21-35

Latest update : January 14, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2026

*sanskritdocuments.org*

# શ્રીરામપ્રોક્તઃ ભગવતઃ વાસુદેવસ્ય ધ્યાનપ્રકારઃ

અગસ્ત્યઃ -
રામ રામ જગન્નાથ વાસુદેવ સનાતન ।
કથં ધ્યાયેદ્વાસુદેવં બ્રૂહિ મે કૃપયા વિભો ॥ ૨૧॥

શ્રીરામઃ -
વાસુદેવમજં શાન્તં કોટ્યર્કેન્દ્વગ્નિસન્નિભવમ્ । (કોટ્યકેન્દ્વાગ્નિ)
અનેકહસ્તચરણમનેકાક્ષિશિરોમુખમ્ ॥ ૨૨॥

અતીન્દ્રિયમમર્યાદમ્ અત્યદ્ભુતવપુર્ધરમ્ ।
ભાસયન્તં દિશઃ સર્વાઃ દેહનિર્યત્પ્રભાચયૈઃ ॥ ૨૩॥

અનેકાભરણૈર્યુક્તમનેકાયુધમણ્ડિતમ્ ।
નાનાવર્ણમયં દેવં સ્વયં સુરભિવિગ્રહમ્ ॥ ૨૪॥

ઋષિભિશ્ચ મરીચ્યાદ્યૈર્બ્રહ્માદ્યૈરપિ દૈવતૈઃ । (બ્રાહ્મણૈરપિ)
અચિન્ત્યમહિમાનં તમિન્દિરાદ્યૈરભિષ્ટુતમ્ ॥ ૨૫॥

કો વા ધ્યાતું ક્ષમો લોકે કો વા સ્તોતું ભુવિ ક્ષમઃ ।
તથાપિ પરમેશાનં પુરુષં ભક્તવત્સલમ્ ॥ ૨૬॥

ચતુર્ભુજમુદારાઙ્ગં શઙ્ખચક્રગદાધરમ્ ।
કિરીટહારકટકકાઞ્ચીકુણ્ડલમણ્ડિતમ્ ॥ ૨૭॥

શ્રીવત્સકૌસ્તુભસ્વચ્છયજ્ઞસૂત્રાઙ્ગુલીયકમ્ ।
દિવ્યપીતામ્બરધરં કલક્વણિતનૂપુરમ્ ॥ ૨૮॥

અષ્ટભિશ્ચાપિ દેવીભિઃ પ્રાઞ્જલીભિશ્ચ સેવિતમ્ ।
પક્ષીન્દ્રવિષ્વક્સેનાભ્યાં પરિવારૈશ્ચ સેવિતમ્ ॥ ૨૯॥

અતિપ્રસન્નવદનં બાલકં તિલકોજ્જ્વલમ્ ।
અભયપ્રદમાસીનં શેષભોગાસને શુભે ॥ ૩૦॥

દિવ્યગન્ધવિલિપ્તાઙ્ગં નાનામાલ્યોપશોભિતમ્ ।
સ્મિતેન વિજિતજ્યોત્સ્નં નીલનીરજલોચનમ્ ॥ ૩૧॥ (નીરદલોચનમ્)

કમ્બુકણ્ઠં મહાસત્ત્વં પીનોત્તુઙ્ગાંસશોભિતમ્ ।
ઉત્તુઙ્ગપીનવિપુલસમસ્નિગ્ધમહોરસમ્ ॥ ૩૨॥

પુષ્ટોદરં મગ્નનાભિં પૃથુશ્રોણીભરાઞ્ચિતમ્ ।
ઊરુદ્વયકૃતદ્વન્દ્વરમ્ભાસંરમ્ભલક્ષિતમ્ ॥ ૩૩॥

ચરણદ્વન્દ્વવિજિતવિકસત્સરસીરુહમ્ ।
અઙ્ગુષ્ઠનખનિર્યદ્ભિર્ભાનુભિર્જિતભાસ્કરમ્ ॥ ૩૪॥

આજાનુદીર્ઘૈઃ પૃથુલૈઃ હસ્તૈરાયુધધારિણમ્ ।
ધ્યાત્વૈવં વાસુદેવં તં કુર્યાદાવાહનક્રિયામ્ ॥ ૩૫॥

ઇતિ ભાર્ગવતન્ત્રાન્તર્ગતઃ શ્રીરામપ્રોક્તઃ ભગવતઃ
વાસુદેવસ્ય ધ્યાનપ્રકારઃ સમ્પૂર્ણઃ ।
(ભાર્ગવતન્ત્રે નવમોઽધ્યાયઃ)

Encoded and proofread by Vinita Ram

*Shriramaproktah Bhagavatah Vasudevasya Dhyanaprakarah*

pdf was typeset on January 14, 2026

Please send corrections to *sanskrit@cheerful.com*